# શ્રીલક્ષ્મીહયગ્રીવપઞ્ચરત્નમ્

Shri Lakshmihayagriva Pancharatnam

sanskritdocuments.org

March 15, 2018

# Shri Lakshmihayagriva Pancharatnam

# શ્રીલક્ષ્મીહયગ્રીવપઞ્ચરત્નમ્

## Sanskrit Document Information

Text title : lakShmIhayagrIvapancharatnam

File name : lakShmIhayagrIvapancharatnam.itx

Category : vishhnu, vishnu, lakShmI, pancharatna, devii

Location : doc_vishhnu

Transliterated by : Rujuta rujuta5879 at gmail.com

Proofread by : Rujuta rujuta5879 at gmail.com

Latest update : March 15, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 15, 2018

*sanskritdocuments.org*

# Shri Lakshmihayagriva Pancharatnam

# શ્રીલક્ષ્મીહયગ્રીવપઞ્ચરત્નમ્

જ્ઞાનાનન્દામલાત્મા કલિકલુષમહાતૂલવાતૂલનામા
સીમાતીતાત્મભૂમા મમ હયવદના દેવતા ધાવિતારિઃ ।
યાતા શ્વેતાબ્જમધ્યં પ્રવિમલકમલસ્રગ્ધરાદુગ્ધરાશિઃ
સ્મેરા સા રાજરાજપ્રભૃતિનુતિપદં સમ્પદં સંવિધત્તામ્ ॥ ૧॥

તારાતારાધિનાથસ્ફટિકમણિસુધાહીરહારાભિરામા
રામા રત્નાબ્ધિકન્યાકુચલિકુચપરીરમ્ભસંરમ્ભધન્યા ।
માન્યાઽનન્યાર્હદાસ્યપ્રણતતતિપરિત્રાણસત્નાત્તદીક્ષા
દક્ષા સાક્ષાત્કૃતૈષા સપદિ હયમુખી દેવતા સાઽવતાન્નઃ ॥ ૨॥

અન્તર્ધ્વાન્તસ્ય કલ્યં નિગમહૃદસુરધ્વંસનૈકાન્તકલ્યં
કલ્યાણાનાં ગુણાનાં જલધિમભિનમદ્બાન્ધવં સૈન્ધવાસ્યમ્ ।
શુભ્રાંશુ ભ્રાજમાનં દધતમરિદરૌ પુસ્તકં હસ્તકઞ્જૈઃ
ભદ્રાં વ્યાખ્યાનમુદ્રામપિ હૃદિ શરણં યામ્યુદારં સદારમ્ ॥ ૩॥

વન્દે તં દેવમાદ્યં નમદમરમહારત્નકોટીરકોટી-
વાટીનિયત્નનિર્યદ્ઘૃણિગણમસૃણીભૂતપાદાંશુજાતમ્।
શ્રીમદ્રામાનુજાર્યશ્રુતિશિખરગુરુબ્રહ્મતન્ત્રસ્વતન્ત્રૈઃ
પૂજ્યં પ્રાજ્યં સભાજ્યં કલિરિપુગુરુભિશ્શશ્વદશ્વોત્તમાઙ્ગમ્ ॥ ૪॥

વિદ્યા હૃદ્યાઽનવદ્યા યદનઘકરુણાસારસારપ્રસારાત્
ધીરાધારાધરાયામજનિ જનિમતાં તાપનિર્વાપયિત્રી ।
શ્રીકૃષ્ણ બ્રહ્મતન્ત્રાદિમપદકલિજિત્સંયમીન્દ્રાર્ચિતં તત્
શ્રીમદ્ધામાતિભૂમ પ્રથયતુ કુશલં શ્રીહયગ્રીવનામ ॥ ૫॥

ઇતિ શ્રીકૃષ્ણબ્રહ્મતન્ત્રપરકાલમહાદેશિકકૃતિષુ
શ્રીલક્ષ્મીહયગ્રીવપઞ્ચરત્નં નામ સ્તોત્રં સમાપ્તમ્ ॥

Encoded and proofread by Rujuta rujuta5879 at gmail.com

*Shri Lakshmihayagriva Pancharatnam*

pdf was typeset on March 15, 2018

Please send corrections to *sanskrit@cheerful.com*